## चतुर्थः पाठः

# प्रहेलिकाः

### (सन्धि)

(बालकों के बौद्धिक विकास के लिए गणित के समान प्रहेलिकाओं का बहुत महत्त्वपूर्ण स्थान है । पाठ्यपुस्तकों में प्रहेलिकाओं का समावेश अत्याधुनिक समय में होने लगा है । इनमें कुछ समस्याएँ दी जाती हैं जिनका समाधान छात्र-छात्राएँ अपनी बुद्धि को लगाकर करते हैं । यह कार्य समुचित बौद्धिक व्यायाम करा देता है । अन्य भाषाओं के समान संस्कृत में प्राचीन काल से ही विभिन्न रूपों की प्रहेलिकाएँ प्रचलित रही है । कुछ प्रहेलिकाएँ तो टीकाओं के बिना समझ में नहीं आतीं किन्तु अपेक्षाकृत सरल होती हैं । प्रस्तुत पाठ में ऐसी पाँच प्रहेलिकाएँ दी गयी हैं ।)





1. रेफ आदौ मकारोऽन्ते वाल्मीकिर्यस्य गायकः ।
   सर्वश्रेष्ठं यस्य राज्यं वद कोऽसौ जनप्रियः ॥
2. मेघश्यामोऽस्मि न कृष्णो, महाकायो न पर्वतः ।
   बलिष्ठोऽस्मि न भीमोऽस्मि, कोऽस्म्यहं नासिकाकरः ॥
3. चक्री त्रिशूली न हरो न विष्णुः, महान् बलिष्ठो न च भीमसेनः ।
   स्वच्छन्दगामी न च नारदोऽपि, सीतावियोगी न च रामचन्द्रः ॥





4. दन्तैर्हीनः शिलाभक्षी निर्जीवो बहुभाषकः ।
   गुणस्यूतिसमृद्धोऽपि परपादेन गच्छति ।।

5. स्वच्छाच्छवदनं लोकाः द्रष्टुमिच्छन्ति मे यदा ।
   तत्रात्मानं हि पश्यन्ति खिन्नं, भद्रं यथायथम् ।।

   (उत्तराणि – रामः, गजः, वृषभः, उपानह, दर्पणम्)

**शब्दार्थः**

**रेफ** = रकार

**आदौ** = शुरू में

**मकारोऽन्ते** (मकारः + अन्ते) = मकार अन्त में हो

**गायकः** = गवैया, गानेवाला

**सर्वश्रेष्ठम्** = सबसे अच्छा

**वद** = बोलो

**कोऽसौ** (कः + असौ) = कौन वह

**जनप्रियः** = लोकप्रिय

**मेघश्यामः** = बादल की तरह साँवला

**कृष्णः** = श्रीकृष्ण

**महाकायः** = विशाल शरीर वाला

**बलिष्ठोऽस्मि** (बलिष्ठः + अस्मि) = बलवान हूँ

**भीमोऽस्मि** (भीमः + अस्मि) = भीम (पाण्डवों में से एक) हूँ, भयंकर हूँ।

**कोऽस्म्यहम्** (कः + अस्मि + अहम्) = कौन हूँ मैं

**नासिकाकरः** =नाक रूपी हाथ वाला (कर= हाथ, सूँड़)जिसकी सूँड़ में नाक हो

**चक्री** = चक्रधारी, चक्र की छाप वाला

**त्रिशूली** = त्रिशूलधारी, त्रिशूल की छाप वाला

**हरो (हरः)** = शिव

**स्वच्छन्दगामी** = स्वतन्त्र रूप से भ्रमण करने वाला

**सीतावियोगी** = हल से अलग, सीता से अलग

**नारदः** = देवर्षि, ब्रह्मा जी के पुत्र (जो हमेशा घूमते रहते हैं)

**दन्तैर्हीनः** (दन्तैः + हीनः) = दाँतों से रहित

**शिलाभक्षी** = चट्टानों को खाने वाला, उनसे अप्रभावित

**निर्जीवः** = प्राणरहित

**बहुभाषकः** = बहुत बोलने वाला

**गुणस्यूतिसमृद्धः** = धागों (गुण) की सिलाई से युक्त

**परपादेन** = दूसरों के पैर से

**स्वच्छाच्छवदनम्** (स्वच्छ + अच्छवदनम्) = साफ व अच्छा मुख

**द्रष्टुमिच्छन्ति** (द्रष्टुम् + इच्छन्ति) = देखना चाहते हैं

**आत्मानम्** = अपने को

**खिन्नम्** = दुःखी / उदास

**भद्रम्** = अच्छा

**यथायथम्** = जैसा हो वैसा

**सन्धिविच्छेदः**

मकारोऽन्ते = मकारः + अन्ते (विसर्ग – सन्धिः)

वाल्मीकिर्यस्य = वाल्मीकिः + यस्य (विसर्ग – सन्धिः)

कोऽसौ = कः + असौ (विसर्ग – सन्धिः)

मेघश्यामोऽस्मि = मेघश्यामः + अस्मि (विसर्ग – सन्धिः)

बलिष्ठोऽस्मि = बलिष्ठः + अस्मि (विसर्ग – सन्धिः)

भीमोऽस्मि = भीमः + अस्मि (विसर्ग – सन्धिः)

कोऽस्म्यहम् = कः + अस्मि + अहम् (विसर्ग – सन्धिः, यण् सन्धिः)

दन्तैर्हीनः = दन्तैः + हीनः (विसर्ग – सन्धिः)

गुणस्यूतिसमृद्धोऽपि = गुणस्यूतिसमृद्ध : + अपि (विसर्ग – सन्धिः)

स्वच्छाच्छवदनम् = स्वच्छ + अच्छवदनम् (दीर्घ–सन्धिः)

नारदोऽपि = नारदः + अपि (विसर्ग – सन्धिः)

## प्रकृति-प्रत्यय-विभागः

| | | |
|---|---|---|
| वद | = | √वद् , लोट्लकारः, मध्यमपुरुषः, एकवचनम् |
| रुदन्ति | = | √रुद् , लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| गच्छति | = | √गम् , लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| द्रष्टुम् | = | √दृश् + तुमुन् |
| इच्छन्ति | = | √इष् लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| पश्यन्ति | = | √दृश् , लट्लकारः, प्रथमपुरुषः, बहुवचनम् |

## अभ्यासः

### मौखिकः

1. **निम्नलिखितानां पदानाम् उच्चारणं कुरुत -**

मकारोऽन्ते, कोऽसौ, बलिष्ठोऽस्मि, भीमोऽस्मि, दन्तैर्हीनः, गुणस्यूतिसमृद्धः, स्वच्छाच्छवदनम्, द्रष्टुमिच्छन्ति, स्वच्छन्दगामी, नारदोऽपि ।

2. **मातृभाषायाम् एकां प्रहेलिकां वदत ।**

3. **निम्नलिखितानां पदानां द्विवचनं वदत -**

इच्छति, पश्यति, वदसि, आगच्छामि, गच्छति, भवति ।

### लिखितः

4. **अधोलिखितानां प्रश्नानाम् उत्तरम् एकपदेन लिखत -**

(क) कः पशुः नासिकया शाखां त्रोटयति ?

(ख) जनाः कस्मिन् स्वमुखं पश्यन्ति ?

(ग) जनाः पादयोः किं धारयन्ति ?

(घ) भीमसेनः कीदृशः आसीत् ?

(ङ) कः महाकायः अत्र वर्णितः ?

(च) कः जनप्रियः ?

5. अधोलिखितानां प्रश्नानाम् उत्तरम् पूर्णवाक्येन लिखत –

(क) कस्य राज्यं सर्वश्रेष्ठम् ?

(ख) श्रीरामचन्द्रस्य पत्नी का आसीत् ?

(ग) गजात् भिन्नः कः मेघवत् श्यामः अस्ति ?

(घ) पादरक्षकः केषां भक्षणं करोति ?

(ङ) लोकाः दर्पणे आत्मानं कथं पश्यन्ति ?

(च) वाल्मीकिः कस्य गायकः ?

6. अधोलिखितानां पदानां सन्धिं कुरुत –

(क) वाल्मीकिः + यस्य = ..............................

(ख) भीमः + अस्मि = ..............................

(ग) कः + असौ = ..............................

(घ) दन्तैः + हीनः = ..............................

(ङ) मकारः + अन्ते = ..............................

(च) कः + असौ = ..............................

(छ) नारदः + अपि = ..............................

7. मञ्जूषायाः उचितपदानि चित्वा वाक्यानि पूरयत –

**निर्जीवो, सीतावियोगी, पर्वतः, पश्यन्ति, कृष्णो, गायकः, विष्णुः**

(क) महाकायो न .................................... ।

(ख) दन्तैर्हीनः शिलाभक्षी .......................... बहुभाषकः ।

(ग) ................... न च रामचन्द्रः ।

(घ) मेघश्यामोऽस्मि नो ............................. ।

(ङ) तत्रात्मानं हि .............................. खिन्नम् ।

(च) वाल्मीकिर्यस्य ............................. ।

(छ) चक्री त्रिशूली न हरो न ........................ ।

## 8. अधोलिखितपदानां बहुवचनं लिखत –

| | एकवचनम् | | बहुवचनम् |
|---|---|---|---|
| यथा– | चलति | = | चलन्ति |
| (क) | गच्छति | = | .................... |
| (ख) | पश्यति | = | .................... |
| (ग) | वदामि | = | .................... |
| (घ) | भवसि | = | .................... |
| (ङ) | तिष्ठामि | = | .................... |
| (च) | इच्छति | = | .................... |
| (छ) | नमामि | = | .................... |

## 9. विपरीतार्थकशब्दयोः सुमेलनं कुरुत –

| अ | | | आ | |
|---|---|---|---|---|
| (क) | खिन्नः | – | 1. | अन्तः |
| (ख) | निर्जीवः | – | 2. | हसन्ति |
| (ग) | रुदन्ति | – | 3. | प्रसन्नः |
| (घ) | आदिः | – | 4. | सजीवः |
| (ङ) | कृष्णः | – | 5. | अल्पभाषकः |
| (च) | बहुभाषकः | – | 6. | धवलः |

**10. अधोलिखितानां शब्दानां लोट्लकारे रूपं लिखत –**

| | लट्लकारः | | लोट्लकारः |
|---|---|---|---|
| **यथा –** | पठति | | पठतु |
| (क) | पश्यति | – | ........................ |
| (ख) | गच्छतः | – | ........................ |
| (ग) | वदति | – | ........................ |
| (घ) | भवन्ति | – | ........................ |
| (ङ) | तिष्ठति | – | ........................ |
| (च) | अस्ति | – | ........................ |
| (छ) | ददाति | – | ........................ |
| (ज) | हससि | – | ........................ |

11. पुस्तकम् – लता वस्त्रम् – रणधीरः

| | | | | | |
|---|---|---|---|---|---|
| लेखनी | - | रुणा | उपनेत्रम् | - | मुकेशः |
| गृहम् | - | शुभाङ्गी | आम्राणि | - | आफताबः |
| घटी | - | बबीता | अङ्गुलीयकम् | - | ललिताः |
| | | | घटः | - | मनोजः |

**मञ्जूषायां केषाञ्चित् वस्तूनां नामानि सन्ति । पार्श्वे तेषां स्वामिनः अपि निर्दिष्टाः। उदाहरणानुसारं किं कस्य इति निर्दिशत।**

**यथा -** 1. एषा कर्तरी रघुवीरस्य ।

2. ............... पुस्तकम् ................. ।

3. ................ लेखनी .................. ।

4. ................. गृहम् .................. ।

5. ................. घटी ................ ।

6. ................. वस्त्रम् ............... ।

7. ............... उपनेत्रम् ............... ।

8. ............... आम्राणि .............. ।

9. ................. अङगुलीयकम् ................... ।

10. .................. घटः ....................... ।

## योग्यता-विस्तारः

**प्रत्याहार** - व्याकरण शास्त्र में अक्षरों या प्रत्ययों की सूची को समेटने वाले शब्दों को 'प्रत्याहार' कहते हैं। संक्षेपण की यह प्रक्रिया अत्यन्त प्राचीन है। आचार्य पाणिनि के चौदह सूत्रों के आधार पर वर्णसंबन्धी प्रत्याहार की रचना की जाती है जिसमें दो वर्ण होते हैं । प्रथम वर्ण पूरा वर्ण होता है जबकि दूसरा वर्ण उन चौदह सूत्रों में से किसी के अन्तिम वर्ण के रूप में अर्थात् **'हल्'** होता है । प्रत्याहारों को समझने के लिए पहले

पाणिनि के चौदह सूत्रों को स्मरण रखना आवश्यक है । इन्हें 'प्रत्याहार सूत्र'' भी कहते हैं –

| | | |
|---|---|---|
| 1. अइउण् | 2. ऋलृक् | 3. एओङ् |
| 4. ऐऔच् | 5. हयवरट् | 6. लण् |
| 7. ञमङणनम् | 8. झभञ् | 9. घढधष् |
| 10. जबगडदश् | 11. खफछठथचटतव् | 12. कपय् |
| 13. शषसर् | 14. हल् | |

इनसे अक्, अच्, इक्, यण् इत्यादि प्रत्याहार बनते हैं । अक् से निम्नलिखित वर्णों का ग्रहण होता है – अ, इ, उ, ऋ, लृ । इसी प्रकार **अच्** कहने से **अ** से लेकर **औ** तक सभी स्वरवर्ण आ जाते हैं । ध्यान रहे कि हल् वर्णों को प्रत्याहार के भीतर नहीं लिया जाता । कुछ अन्य उदाहरण – इक् = इ उ ऋ लृ ।

यण् = य् व् र् ल् । जश् = ज् ब् ग् ड् द् ।

प्रत्याहारों को बहुत वैज्ञानिक ढंग से सजाया गया है । इन्हें हम आगे चलकर समझेंगे । स्मरणीय है कि **'अच्'** कहने से केवल स्वरवर्णों का और **'हल्'** कहने से सभी व्यञ्जनों का बोध हो जाता है । पाणिनि ने अपने व्याकरण में इन सूत्रों के आधार पर 42 प्रत्याहारों का प्रयोग किया है ।

प्रत्ययों से भी प्रत्याहार बनते हैं जैसे सुप् = प्रातिपदिक से लगने वाले सभी प्रत्यय (सु से लेकर प् तक) । तिङ् = धातु से लगने वाले वे प्रत्यय जो **ति** से लेकर **ङ्** तक (कुल 18) हैं । सुट् आदि प्रत्याहार भी हैं ।